# Ganapati Suktam from Rigveda

आ तू नं इन्द्र क्षुमन्तं चित्रं ग्राभं सं गृंभाय ।
महाहस्ती दक्षिणेन ॥ ८.०८१.०१
विद्मा हि त्वां तुविकूर्मिं तुविदेष्णं तुवीमंघम् ।
तुविमात्रमवोभिः ॥ ८.०८१.०२
नहि त्वां शूर देवा न मर्तासो दित्संन्तम् ।
भीमं न गां वारयंन्ते ॥ ८.०८१.०३
एतो न्विन्द्रं स्तवामेशांनं वस्वः स्वराजंम् ।
न राधंसा मर्धिषन्नः ॥ ८.०८१.०४
प्रस्तोषदुपं गासिषच्छ्रवत्सामं गीयमांनम् ।
अभि राधंसा जुगुरत् ॥ ८.०८१.०५
आ नो भर दक्षिणेनाभि सव्येन प्र मृंश ।
इन्द्र मा नो वसोर्निर्भाक् ॥ ८.०८१.०६
उपं क्रमस्वा भंर धृषता धृंष्णो जनांनाम् ।
अदांशूष्टरस्य वेदः ॥ ८.०८१.०७
इन्द्र य उ नु ते अस्ति वाजो विप्रेंभिः सनिंत्वः ।
अस्माभिः सु तं संनुहि ॥ ८.०८१.०८
सद्योजुवंस्ते वाजां अस्मभ्यं विश्वश्चंन्द्राः ।
वशैश्च मक्षू जंरन्ते ॥ ८.०८१.०९

गणानां त्वा गणपंतिं हवामहे कविं कंवीनामुंपमश्रंवस्तमम् ।
ज्येष्ठराजं ब्रह्मंणां ब्रह्मणस्पत आ नः शृण्वन्नूतिभिः सीद सादंनम् ॥ २.०२३.०१
निषुसींद गणपते गणेषु त्वामांहुर्विप्रंतमं कवीनाम् ।
न ऋते त्वत्क्रिंयते किं चनारे महामर्कं मंघवञ्चित्रमंर्च ॥ १०.११२.०९
अभिख्या नो मघवन्नाधंमानान्सखे बोधि वंसुपते सखींनाम् ।
रणं कृधि रणकृत्सत्यशुष्माभंक्ते चिदा भंजा राये अस्मान् ॥ १०.११२.१०

ॐ शान्तिः शान्तिः शान्तिः ॥